VIDYA - A JOURNAL OF GUJARAT UNIVERSITY

*Peer-Reviewed, Multidisciplinary & Multilingual Journal*

**ISSN:** 2321-1520 **E-ISSN:** 2583-3537

# ।।जे. डबल्यू. क्रेस्वेलप्रतिपादितानाम् अनुसन्धानचरणानां न्यायशास्त्रे सन्निवेशः।।

**राज्यगुरु जयदेवः धीरुभाई**

**शोधच्छात्रः(Ph.D.) – भाषासाहित्यभवनम्, गुजरात - विश्वविद्यालयः , अहमदावादः**
**Phone – 7874881081, email – jaydevjd619@gmail.com**

## ।। प्रस्तावना ।।

दर्शनशास्त्रस्य उपादेयता न केवलं मोक्षाय परं अनुसन्धानक्षेत्रेष्वपि महत्यस्ति। तत्रापि शैक्षिकानुसन्धाने तु दर्शनान्परित्यज्य नान्या गतिः संशोधकानाम्। अनया जिज्ञासया स्वीकृतोऽयं विषयः- **जे. डबल्यू. क्रेस्वेल प्रतिपादितानाम् अनुसन्धानचरणानां न्यायशास्त्रे सन्निवेशः**। अत्र शोधपत्रे एते बिन्दवः निरूपिताः –

## विषयप्रवेशः - पाश्चात्यविदुषां शोधकार्येषु योगदानम्।

अनुसन्धानशब्देनैव पाश्चात्यविदुषां योगदानं दृग्गोचरी जायते। यतो हि मनुष्याणां सौकर्यार्थं जगति ये विद्यमानाः वस्तुपदार्थाः दरिदृश्यन्ते ते सर्वेऽपि प्रायः पाश्चात्यविद्वद्भिः शोधिताः अनुसन्धिताश्च। उदाहरणानुसारं पश्यामः।

यत् – वाष्पयन्त्रस्य शोधः पाश्चात्यवैज्ञानिकः **‘थोमस सेवरी’**[1] इत्यनेन कृतः। यच्चाऽनन्तरं **‘जेम्स वोट’** इति महोदयेन **‘वोट स्टीम एन्जिन’** इति नाम्ना प्रशोधितम्। तथा च गोलदीपस्य शोधः पाश्चात्य विद्वान् **‘हम्फ्रि डेवी’**[2] महोदयेन १८०२ तमे वर्षे कृतः , यश्च १८७९ तमे वर्षे **‘थोमस एडिसन’**[3] महोदयेन पुनः शोधितः। एतत्सर्वं विना अनुसन्धानं नैव शक्यम्। तर्हि प्रश्नः जायते यत् – किं नाम अनुसन्धानम् ? उच्यते यत् –

## अनुसन्धानस्य व्याख्यानिरूपणम्।

ज्ञानस्यविस्तारः एव शोधः, गवेषणा वा अनुसन्धानं कथ्यते। इयं गवेषणा एव आङ्ग्लभाषायाम् RESEARCH इति कथ्यते। अत्र शब्दद्वयं वर्तते। RE- SEARCH अर्थात् ज्ञानस्य पुनः शोधनं वा सम्यक्तया प्रतिपादनम्। एनमेवार्थम् **एडवान्स-लर्नर्स-डिक्शनरी** मध्ये शोधपरिभाषाप्रदर्शने निरूप्यते । यत् –

**“a careful study of a subject, especially in order to discover new facts or information about it.[4]” अर्थात् विषयस्य तथा नूतनानां तथ्यानां वा सूचनायाः सावधानेनाऽध्ययनम्।**

यः कश्चन विषयः वा पदार्थः वर्तते तस्य विविधाभिः दृष्टिभिरवलोकनम्। तथा च अवलोकनेन प्राप्तानां सूचनानां नविनया दृष्ट्या अध्ययनं वा अवलोकनम् । इत्येवं रीत्या यदा सावधानेनावलोकनं क्रियते चेत् पूर्वं चिन्तितायाः समस्यायाः समाधानं यत्प्राप्यते सैव गवेषणा, शोधः, संशोधनं वा कथ्यते। अत्र संशोधनविषये बहव्यः व्याख्याः दातुं शक्यन्ते परं सामान्यरूपेण अवबोधयति **जे. डबल्यू. क्रेस्वेलमहोदयः**[5]।

एते अमेरिकादेशीयाः शिक्षाक्षेत्रे मिश्रितानुसन्धाने कृतभूरिपरिश्रमाः वर्तन्ते। एभिः बहवः शोधलेखाः तथा च २७ पुस्तकानि लिखितानि सन्ति। तेषां मतानुसारम् अनुसन्धानस्य व्यख्या एवं वर्तते। यथा -

**‘कस्यचन विषयस्य सूचनानाम् एकत्रिकरणं तथा च तासां विश्लेषणस्य प्रक्रिया एव अनुसन्धानं कथ्यते।[6]’**

व्याख्यामिमां ज्ञातुं पूर्वमस्माभिः अनुसंन्धानस्य प्रयोजनं ज्ञेयं भवति। वस्तुतः अनुसन्धानं समस्याऽधारितमेव भवति। यथा पिपासुः जलाय यतते, बुभुक्षुः भोजनाय यतते, तथैव जिज्ञासुः ज्ञानाय वा अनुसन्धानाय प्रवर्तते। अत्र पिपासा, बुभुक्षा, तथा जिज्ञासा समस्या वर्तते। तेषां फलं जलं, भोजनं वा ज्ञानं वर्तते। क्रेस्वेलमहाभागाः समस्यायाः समाधानाय एव सूचनानां एकत्रिकरणं तथा च फललाभाय एव प्राप्तानां सूचनानां विश्लेषणकरणमेव अनुसन्धानमभिदधाति। इदानीं तेषां मते ये अनुसन्धानार्थमाधारभूताः चरणाः वर्तन्ते तानालोडयामः।

## अनुसन्धानस्य क्रेस्वेलमहोदयप्रतिपादिता आधारभूताः चरणाः।

| | |
|---|---|
| 1) | समस्यायाः निश्चयः – Identification Of Problems (pose a question). |
| 2) | समस्यासम्बन्धिनां प्रश्नानामुत्तरार्थं सामग्रीणां सङ्कलनम् – Collecting Data To Answer The Questions. |
| 3) | समस्यायाः निवारणं वा प्रश्नानाम् उत्तराणं शोधनम् – Finding Solution To The Problem.[7] |

इदनीमेतेषां स्वरूपं पश्यामः।

### १) समस्यायाः निश्चयः - Identification Of Problems (pose a question).

जानीम एव यत् विना समस्यया अनुसन्धनं नैव जायते। तथा च समस्यायाः स्वरूपं सर्वत्र भिन्नं भिन्नं भवति। तथाऽपि समस्यायाः निश्चये केचन अवधेयाः अंशाः भवन्त्येव। ते च यथा –

http://vidyajournal.org

---

[1] Thomas Savery - https://en.wikipedia.org/wiki/Thomas_Savery
[2] Humphry Davy - https://www.bulbs.com/learning/history.aspx
[3] Thomas Edison - https://www.bulbs.com/learning/history.aspx
[4] Advanced learner’s dictionary - The Advanced Learner’s Dictionary of Current English, Oxford, १९५२, p. १०६९.
[5] J.W. Creswell - https://en.wikipedia.org/wiki/John_W._Creswell
[6] Research - https://en.wikipedia.org/wiki/Research#:~:text=Another%२०definition%२०of%२०research%२०is,of%२०a%२०topic%२०or%२०issue%२२ .
[7] Educational research – john w. creswell, chapter -१, pg- ३

१) संशोधकः यां समस्यां शोधकार्यं कर्तुं चिन्तयति तत्र मौलिकता भवेत्। कथनस्याशयः यत् यस्याः समस्यायाः संशोधनं कर्तुमिच्छति तत्र पूर्वमेव शोधकार्यं न केनाऽपि कृतं स्यात्।

२) यां समस्यां स्वीकुर्मः सा वास्तविकी समस्या स्यात्, यदि तथा न स्यात् चेत् संशोधनेन लाभः न स्यात्। यथा – शोधविषयः - **'पारिवारिकी परिस्थितिः तथा च छात्राणां प्रदर्शनम् अनयोः सम्बन्धस्याऽध्ययनम्'** अत्र परिस्थितिः इति शब्दोऽस्पष्टः वर्तते। अतः समस्या वास्तविकी स्यात्।

३) समस्या रुचिकरी स्यादन्यथा विना रुच्या संशोधनं योग्यतर्काधारितं न भविष्यति तथा च न पूर्णतां यास्यति। अतः संशोधकस्य रुचिः समस्यायां सर्वदैव स्यात्।

४) या समस्या स्वीकृता वर्तते तस्याः समस्यायाः संशोधनेन तत्तत्क्षेत्रेषु तस्य योगदानं भवेत्। यत् संशोधनं कृतं तेन पूर्वविद्यमाने ज्ञाने अभिवृद्धिः जायेत।

५) समस्या संशोधकस्य शैक्षिकयोग्यतानुरूपा भवेत्। अन्यथा समस्या नान्तमवाप्स्यति। संशोधनं च न जायेत।

६) संशोधने जायमानयोः धनसमययोः व्ययः अपि संशोधकेन चिन्तितः स्यात्। अनेन कारणेनाऽपि संशोधनं न पूर्णतामवाप्स्यति।

एते केचन समस्यानिश्चये सहायकाः सन्ति। वस्तुतः समस्यायाः निश्चयः एव संशोधनस्याऽदिमः चरणोऽस्ति। येन समस्यायाः निश्चयः कृतः वर्तते तेन द्वितीये चरणे तावत्कष्टं नाऽनुभूयते। अपरं चरणं पश्यामः।

**२) समस्यासम्बन्धिनां प्रश्नानामुत्तरार्थं सामग्रीणां सङ्कलनम् – Collecting Data To Answer The Questions.**

यदा समस्यायाः निश्चयः सञ्जायते तदा तत्सम्बन्धिनः प्रश्नाः अपि नयनयोः पुरतः नरीनृत्यन्ति। अत्र समस्याधारिताः प्रश्नाः भवन्ति। अतः अत्राऽपि सामग्रीणां बहुविधत्वं दृश्यते। तथाऽपि केचन प्रकल्पाः अत्र प्रदर्श्यन्ते सामग्रीसङ्ग्रहार्थम्। यथा –

१) समस्यासम्बन्धिनः प्रश्नानामुत्तराणां सङ्ग्रहणं प्राथमिकगौणसामग्रीभ्यां गृह्यते। तत्र प्राथमिकी सामग्री तु सर्वेक्षणम्, प्रयोगः इत्यादिभ्यः सङ्गृह्यते यत्र च धनव्ययाधिक्यं जायते। यथा – **सर्वकारीयजनगणना।**

२) गौणसामग्रीणां ग्रहणं तु पुस्तकम्, आन्तर्जालः, शोधपत्रिकादिभिर्गृह्यते। यत्र च व्ययाधिक्यं नैव जायते। यथा – **अइउण्** इत्यस्य ग्रन्थेषु विमर्शः ।

३) कदाचित् अवलोकनविधिनाऽपि सामग्रीणां सङ्ग्रहणं जायते यच्च प्रायः चिकित्सासम्बन्धीशोधकार्येषु जायते। यथा – **सम्प्रति कोरोना-विषाणोः औषधनिर्माणे उपयुक्ता विधिरेषा।**

४) कदाचित् व्यक्तिनां साक्षात्सम्पर्कादिकं कृत्वा सामग्रीसङ्ग्रहणं क्रियते। विधिरेषा पत्रकारैः सर्वदा स्वीक्रियते। यच्च **Ground Zero Reporting** कथ्यते। संशोधकः समस्यासम्बन्धे विज्ञानां जनानां सम्पर्कं कर्तुमर्हति।

५) कदाचित् प्रश्नवलीं निर्माय सामग्रीग्रहणं कर्तुं शक्यते। यच्च आङ्ग्लभाषायां **Questionnaire method** कथ्यते। अत्र समस्यासम्बन्धिनः ये प्रश्नाः भवन्ति तान्संस्थाप्य प्रतिवादिभ्यः मतानि विज्ञातुमत्यन्तमुपयुक्ता भवति। सम्प्रति **google forms** माध्यमेन एषा प्रसिद्धा पद्धतिर्वर्तते।

६) कदाचित् साक्षात्कारेणाऽपि **(Interview Method)** सामग्रीणां सङ्ग्रहणं कर्तुं शक्यते।

समस्यानुगुणम् एतेषां प्रयोगेण समस्यासम्बन्धिनां प्रश्नानामुत्तरार्थं सामग्रीणां सङ्कलनं कर्तुं शक्नुमः। तथा च सङ्गृहिताभिः सामग्रीभिः प्रश्नानाम् उत्तराणि दातुं शक्नुमः । इदानीं तृतीयं चरणं पश्यामः।

**३) समस्यायाः निवारणं वा प्रश्नानाम् उत्तराणां शोधनम् – Finding Solution To The Problem.**

आङ्ग्लतत्त्वचिन्तकः **'कार्ल पोपर'** महोदयः अभिदधाति यत् – **All life is problem solving.**[8] कथनस्याऽशयः यत् वयं सम्पूर्णे जीवने समस्यानां निवारणमेव कुर्मः। अर्थात् वयं सम्पूर्णे जीवने ज्ञानेनाऽज्ञानेन शोधकार्ये एव निरताः भवामः। अस्माकं परितः विद्यमानानि सौकर्यप्रदायीनि सर्वाण्यपि वस्तूनि संशोधनस्य परिणामः वर्तते। तथा च यथोऽक्तं पूर्वं यत् संशोधनस्य मूलं समस्या एव भवति।

उदाहरणेन पश्यमः यथा – ग्रीष्मकाले जलं शीतलङ्कर्तुं तथा च जले अवकराणां प्रपतनं न जायेत इत्यतः घटस्य संशोधनम्, वर्षायां जलात् संरक्षणार्थं छत्रस्य संशोधनम्, शैत्ये ऊर्णवस्त्राणां संशोधनम्, गणनार्थं अङ्कानां संशोधनम्, रघुवंशस्य अर्थाणामवगमनार्थं तट्टीकानां संशोधनम् इत्येवं सर्वत्र समस्यामूलमेव संशोधनं वर्तते। **'सुपर ३०'** इति किञ्चन हिन्दीचलचित्रं वर्तते। यत्र चोक्तम् **'आपत्ति से ही आविष्कार का जन्म होता है।'**[9] अतः समस्यानां निवारणमेव संशोधनं वर्तते। **"The search for knowledge through objective and systematic method of finding solution to a problem is research.**[10]**"** अर्थात् ज्ञानस्याऽन्वेषणाय यया प्रक्रियया तथा च येनोऽद्देश्येन समस्यानां समाधानं संशोध्यते तदेव अनुसंधानमिति कथ्यते। एते त्रयः अनुसन्धानस्य चरणाः वर्तन्ते ।

एतेषां चरणानामनुपालनेन समस्यायाः समाधानं प्राप्तुं शक्नुमः। तथा च अनुसन्धानं कर्तुं शक्नुमः। यथा पूर्वमुक्तं यत् अनुसन्धानम् इत्यत्र पदद्वैविध्यं वर्तते, तथा च पाश्चात्याऽनुसन्धानकर्तृभिरेव संशोधनानि कृतानि सन्ति इति न परन्तु अस्माकं भारतदेशेऽपि अनुसन्धानस्य परंपरा प्राचीनकालादेव वर्तते। वस्तुतः दर्शनशास्त्रेषु एतस्याः परंपरायाः दर्शनं सम्यक्तया जायत एव। तत्र च प्रधानं दर्शनं वर्तते न्यायदर्शनम्। इदनीं जे. डबल्यू. क्रेस्वेलमहोदयैः प्रतिपादितानाम् एतेषां त्रयाणां चरणानां न्यायशास्त्रे कुत्र कथं सन्निवेशः जातः तज्जिज्ञासामः।

तत्र च –

## जे. डबल्यू. क्रेस्वेलमहोदयैः प्रतिपादितानाम् चरणानां न्यायशास्त्रे सन्निवेशः।

**१) समस्यायाः निश्चयः – Identification Of Problems (pose a question) इत्यस्य न्यायशास्त्रे निदर्शनम्।**

अत्र शास्त्रप्रवृत्तिः कारणत्वेन स्वीकरणीया स्यात्। शास्त्राणां प्रवृत्तिः सर्वदा समस्याधारिता एव भवति। अत्र प्रश्नः समुत्पद्यते यत् – कथं शास्त्राणां प्रवृत्तिः समस्याधिना? अत्रोच्यते - अद्वैतवेदान्तदर्शनस्य सदानन्दमुनिप्रतिपादितस्य प्रकरणग्रन्थस्य वेदान्तसारनाम्नः अनुबन्धचतुष्टयनिरूपणानन्तरं सद्यः एव निरूपितं यथा-

**'अयमधिकारी जननमरणादिसंसारानलसन्तप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति...........।'**[11]

---

[8] Google books - https://books.google.co.in/books/about/All_Life_is_Problem_Solving.html?id=Pa३cZYwdq२८C&source=kp_book_description&redir_esc=y

[9] Super ३० – Bollywood movie - https://en.wikipedia.org/wiki/Super_३०_(film) - https://wittycolumn.com/top-१०-dialogues-of-super-३०/

[10] Research methodology – C.R. Kothari, २००४, p- १

[11] वेदान्तसारः – सदानन्दमुनिप्रणीतम्

http://vidyajournal.org

VIDYA - A JOURNAL OF GUJARAT UNIVERSITY

*Peer-Reviewed, Multidisciplinary & Multilingual Journal*

**ISSN:** 2321-1520 **E-ISSN:** 2583-3537

अत्र समस्या प्रदर्शिता वर्तते यत् यो अधिकारी जननमरणादिभिः सन्तप्तः भवति सः मोक्षाय यतमानो भवति। अतः अत्र समस्यानिश्चयः जातः वर्तते।

न्यायशास्त्रे पश्यामः। यथा – यदा पुरुषस्य स्वार्थानुमितिः जायते तदनन्तरं सः परार्थानुमित्यै प्रवृत्तो भवति तदा स पञ्चावयववाक्यान् प्रयुङ्क्ते। ते च यथा –

**'प्रतिज्ञाहेतूदाहरणोपनयनिगमान्यवयवाः।**[12]**'**

सूत्रमिदं भगवान् गौतमः न्यायशास्त्रे न्यरूपयत्। सूत्रेऽस्मिन् परार्थानुमानाय एतेषां पञ्चावयववाक्यानां निरूपणं विद्यते। अत्र प्रतिज्ञायाः स्वरूपं विज्ञेयम् । तथा चोक्तम् – **'साध्यनिर्देशः प्रतिज्ञा।**[13]**'** अर्थात् यत्र साध्यस्य निरूपणं क्रियते सा प्रतिज्ञा वर्तते। प्रसिद्धमनुमानं च यथा – **'पर्वतो वह्निमान् धूमात्'।** अत्र साध्यः – वह्निः। तथा च तर्कभाषायां तर्कसङ्ग्रहे च निगदितं यत् – **'पर्वतो वह्निमान् इति प्रतिज्ञा**[14]**'**।

अत्र भगवान् गौतमः इदम्बोधयत्यस्मान् यत् – पर्वते वह्निः साधनीयाऽस्ति। तथा च यदि पर्वते वह्निः साधनीया इति ज्ञानमेव **समस्यायाः निश्चयः।** यदि समस्या निश्चिता न जायेत चेत् कथं यथार्थमनुमानज्ञानमुत्पद्येत? अतः अत्र क्रेस्वेल महोदयात्प्रागेव भगवान् गौतमः एतन्यरूपि।

इदानीं समस्यानिश्चये कथमत्र दोषाः न सन्ति तदप्यत्र निरूप्यते। यथा-

- ➢ समस्या मौलिका स्याद्यथार्था च स्यात्। अत्र वह्निना विना नाऽन्येन पदार्थेन समस्या साधयितुं शक्यते।
- ➢ तथा च पर्वते मेघखण्डः नास्तीत्यपि परिज्ञानमनेन जायते।
- ➢ समस्ययाऽनया शास्त्रप्रवृत्यादौ लाभोऽपि जायते। छात्राणां शास्त्रसम्बद्धा भीतिरप्यपगमिष्यति। शास्त्रज्ञाने अभिवृद्धिरपि भविष्यति।
- ➢ धनव्ययस्तु नैव जायते। तथा च यस्यानुभवः वर्तते सः निजाऽनुभवेन अन्येभ्योऽपि तमेवानुभवं अनुभावयितुं शक्नोति यच्च यथार्थ एव स्यात्।
- ➢ तथा च एकस्याः समस्यायाः ज्ञानेन सर्वासां समस्यानां ज्ञानं सारल्येन च सम्भवति।

इत्येवं न्यायशास्त्रे कथं गौतममुनिना समस्यानिश्चयः प्रदर्शितः तन्निरूपितम्। इदानीं अपरचरणस्य निदर्शनं कुर्मः।

### २) समस्यासम्बन्धिनां प्रश्नानामुत्तरार्थं सामग्रीणां सङ्कलनम् – Collecting Data To Answer The Questions इत्यस्य न्यायशास्त्रे निदर्शनम् ।

समस्यासम्बन्धिनां प्रश्नानामुत्तराणि शोधयितुं बहुविधाः मार्गाः प्रदर्शिताः न्यायशास्त्रे। परं समस्या निश्चयः आवश्यकः एतस्य कृते । समस्या निश्चिते सति वयं तत्सम्बन्धिनां प्रश्नानां उत्तराणि दातुं सामग्रीणां सङ्ग्रहणं कर्तुं शक्नुमः।

➢ अत्र सामग्रीणां ग्रहणविषये बहुप्रकाराः वर्तन्ते। सामग्रीणां ग्रहणं प्रत्यक्षरीत्या, अनुमानेन, सादृश्यज्ञानेन तथा च आप्तोपदेशेन जायते। तत्त्वमीमांसा (metaphysics) , ज्ञानमीमांसा (epistemology) इत्यादिभिरपि सामग्रीणां ग्रहणं जायते।

➢ अवलोकनविधिरपि अत्र सम्यक्तया प्रतिपादिता वर्तते। यथोक्तं –

**'शक्तिग्रहं व्याकरणोपमानकोषाऽप्तवाक्याद्व्यवहारतश्च।**

**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।**[15]**'**

➢ अत्र वस्तुतः सामग्रीणां ग्रहणस्य समुच्चयः प्रदर्शितः। सामान्यतया पश्यामः यत् – अनुसन्धाता व्याकरणादि शास्त्रेषु शोधकार्यं करोति, तथा च शब्दानां अर्थानवगमयितुं इच्छति, सः व्याकरणकोषाप्तवाक्यवाक्यशेषादिभिरर्थानवगच्छति। तथा च प्रश्नानामुत्तरान् दातुमितः एव सामग्रीसङ्ग्रहणं कर्तुमर्हति।

➢ यः संशोधकः न्यायादिशास्त्रेषु तथा च सामाजिकशिक्षायां (social studies) शोधकार्यं करोति सः उपमानेन समस्यायाः अवलोकनं कृत्वा उत्तराणि दातुं सामग्रीसङ्ग्रहणं कर्तुं शक्नोति। यथा न्यायशास्त्रे – **'यत्राऽरण्यकेन केनचित् ग्रामिणायोक्तं गोसदृशो गवयपदवाच्यः**[16]**'** इत्यत्र जनसम्पर्कविधेः दर्शनं वर्तते। तथा च गवय इति किं भवतीत्यस्योत्तरमपि सामग्र्याऽनया दातुं शक्यते।

➢ यः संशोधकः मानविकविज्ञानस्य (humanities) समस्यायाः समाधानं कर्तुमिच्छति सः मानवानां व्यवहारेण परिहारः कर्तुं शक्नोति। यथोक्तं न्यायसिद्धान्तमुक्तावल्यां व्यवहारात् शक्तिग्रहे –

**'यथा प्रयोजकवृद्धेन घटमानयेत्युक्तम् ................................आवापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति।**[17]**'**

अत्र घटपदस्य ज्ञाने अज्ञाय बालकाय कथं घटस्य ज्ञानं जायते तत्सम्यक्तया प्रतिपादितं ग्रन्थकर्त्रा। अग्रे च **'चैत्रः पुत्रस्ते जातः कन्या ते गर्भिणी जाता – इत्यादौ मुखप्रसादमुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषाच्छाब्दबोधं निर्णियतेद्धेतुतया तं शब्दमवधारयति।**[18]**'** अनेनात्र ज्ञानं जायते यत् कुत्र सुखानुभवः जातः तथा च दुःखस्य किं कारणं?

अत्र सर्वत्र व्यवहारपूर्वकं सामग्रीणां ग्रहणं वर्तते। तथा च पारिवारिकपक्षस्य संज्ञानमपि जायते।

➢ यथा क्रेस्वेलमहोदयेन प्रतिपादिते सिद्धान्ते interview method नामिका काचित्पद्धतिर्वर्तते। तथैव सामग्रीग्रहणार्थं तथा च समस्यासम्वन्धिनां प्रश्नानामुत्तराणि दातुं शास्त्रार्थपद्धतिः प्राचीनैः आविष्कृता वर्तते। तथा च तत्सम्बन्धिनं ज्ञानं न्यायदर्शनस्यादिमे सूत्रे प्रतिपादितं वर्तते।

तद्यथा –

**'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः।।**[19]**'**

अत्र सूत्रे वादः, जल्पः , वितण्डा , छलम् , निग्रहस्थानम् इत्यादयः साक्षात्कारपद्धतौ (interview method) सहायकाः भवन्तीत्यपि निरूपितं वर्तते। इदानीं अन्तिमं चरणं न्यायशास्त्रे पश्यामः।

---

[12] न्यायसूत्रम् – १/१/३२

[13] न्यायसूत्रम् – १/१/३३

[14] तर्कसंग्रहः, तर्कभाषा - अनुमानखण्डः

[15] न्यायसिद्धान्तमुक्तावली - शब्दखण्डः

[16] न्यायसिद्धान्तमुक्तावली - उपमानखण्डः

[17] न्यायसिद्धान्तमुक्तावली - शब्दखण्डः

[18] न्यायसिद्धान्तमुक्तावली - शब्दखण्डः

[19] न्यायसूत्रम् – १/१/१

http://vidyajournal.org

**३) समस्यायाः निवारणं वा प्रश्नानाम् उत्तराणां शोधनम् – Finding Solution To The Problem इत्यस्य न्यायशास्त्रे सन्निवेशः।**

➢ न्यायशास्त्रे समस्यानां निवारणं तथा च प्रश्नानां समाधानार्थं पूर्वपक्ष-सिद्धान्तपक्षस्य व्यवस्था वर्तते।

➢ यथा शास्त्रान्तरेषु वेदान्तादिषु '**पुत्रादीनामात्मत्वादिखण्डनं**[20]' **निरूपितं वर्तते।** अनेन ज्ञायते यत् कथं समस्यायाः निवारणं क्रमानुगुणं क्रियते।

➢ न्यायशास्त्रे अनुमानखण्डे व्याप्तिपरिष्कारार्थं गदाधरभट्टाचार्येण विरचितानां **पञ्चलक्षणी, चतुर्दशलक्षणी** तथा च **सिद्धान्तलक्षणम्** इत्यादीनां ग्रन्थानां रचना जाता वर्तते। वस्तुतः एते सर्वेऽपि व्याप्तिरूपायाः समस्यायाः निवारणार्थमेव निगदिताः वर्तन्ते।

➢ तथा च यथा पूर्वोक्तं दर्शनशास्त्राणां रचना समस्याधारिता वर्तते, अत एव न्यायशास्त्रस्य रचनाऽपि मोक्षरूपायाः समस्यायाः समाधानार्थमेव जाता वर्तते । अत एवोक्तं यत् – '**तत्त्वज्ञानात् निःश्रेयसाऽधिगमः।**[21]' इत्येवं तृतीयस्य चरणस्य न्यायशास्त्रे सन्निवेशः प्रदर्शितः।

## ।। संशोधनस्यलाभा उपसंहारश्च ।।

जे. डबल्यू . क्रेस्वेलमहाभागैः ये अनुसन्धानस्य आधारभूताः त्रयः चरणाः प्रतिपादिताः सन्ति, ते वस्तुतः प्रशंसनीयाः सन्ति। एतेषां चरणानां निरूपणं तैः **'EDUCATIONAL RESEARCH'** इति नाम्नि पुस्तकमध्ये कृतं वर्तते। परन्तु एतेषां चरणानां निरूपणं भगवता गौतमेन न्यायदर्शने कृतमेव वर्तते। तथा च एतेषां क्रेस्वेलप्रतिपादितचरणानामध्ययनम् अस्मभ्यं किञ्चित् क्लिष्टकरमपि प्रतिभाति। यदा च न्यायशास्त्रानुगुणं यदि एतेषामेव चरणानामध्ययनं छात्रैः क्रियते चेत् सरलया शैल्या ज्ञानं ज्ञायेत। अनेन शोधपत्रेण लाभाः जायन्ते। यथा –

➢ ये शैक्षिकाऽनुसन्धातारः (Academician) वर्तन्ते तैः न्यायशास्त्रस्य अध्ययनं क्रियते चेत् क्रेस्वेलप्रतिपादितानां सिद्धान्तानां ज्ञानं तेभ्यः सरलतया जायते।

➢ शोधपत्रेऽस्मिन् पाश्चात्यशोधकर्तृणाम् आविष्काराणां निरूपणं कृतं वर्तते।

➢ न्यायशास्त्रे प्रतिपादितानां अनुसन्धानसम्बन्धिनां विषयाणां ज्ञानं जायते।

➢ शोधपत्रेनाऽनेन क्रेस्वेलप्रतिपादितसिद्धान्तानाम् अपि संज्ञानं जायते।

➢ गौतममहर्षेः अनुसंन्धानविषयकं ज्ञानवैशिष्ट्यस्य लाभः जायते।

➢ क्रेस्वेलप्रतिपादितसिद्धान्तानां न्यायशास्त्रे निदर्शनं दृश्यते।।

## ।। इति शम् ।।

## आकरग्रन्थाः


1. **Oxford advance learner's dictionary** - Hornby, Albert Sydney. Oxford Advanced Learner's Dictionary of Current English / [by] A.S. Hornby; Editor Jonathan Crowther. Oxford, England: Oxford University Press, १९९५.
2. **Educational research** – planning, conducting and evaluating quantitative and qualitative research,४th ed. john w. Creswell, २०१२
3. **All life is problem-solving** – Karl Raimund popper, Routledge, ११ new fatter lanes, London EC४P ४EE – १९९९
4. **Research methodology** – c.r. Kothari, NEW AGE INTERNATIONAL (P) LIMITED, PUBLISHERS ४८३५/२४, Ansari Road, Daryaganj, New Delhi – ११०००२, २००४,
5. **Research methodology** – Shakshi k Gupta & dr. praneet rangi, Kalyani publishers, Ludhiana – २०१०
6. **वेदान्तसारः – श्रीसदानन्दयतिविरचितः । परिमल पब्लीकेशन – २०१७**
7. **न्यायसिद्धान्तमुक्तावली – श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता । चन्द्रकलया व्याख्ययालंङ्कृतया दिनकर्या। चौखम्बा संस्कृत भवनम् – २०१८**
8. **कारिकावली – श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता । प्रभा – मञ्जूषा – दिनकरी – रामरूद्री – सहिता । चौखम्बा संस्कृत प्रतिष्ठान – २०१०**
9. **कारिकावली – श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता । चौखम्बा सुरभारती प्रकाशन – २०१४**
10. **न्यायसिद्धान्तमुक्तावली – श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता । मोतीलाल बनारसीदास पब्लीशर्स – २०१७**
11. **ન્યાયસિદ્ધાંતમુક્તાવલી - ભાગ ૨, પૂ પ, ચંદ્રશેખર વિજય જી, કમલ પ્રકાશન ટ્રસ્ટ, અમદાવાદ** – २००८
12. **तर्कसङ्ग्रहः – श्रीमदन्नंभट्टविरचितः । चौखम्बा संस्कृत सीरीज ओफिस, वाराणसी – २०१०**
13. **तर्कभाषा – श्री केशवमीश्रप्रणीता। मोतीलाल बनारसीदास पब्लीशर्स – २०१७**
14. **वेदान्तसारः – श्रीसदानन्दयतिविरचितः। चौखम्बा विद्याभवन – २०१८**
15. **न्यायदर्शनम् – न्यू भारतीय बुक कोर्पोरेशन । २००३**


## आन्तर्जालीयस्रोतांसि


1. ADVANCED LEARNER'S DICTIONARY- https://www.oxfordlearnersdictionaries.com/definition/english/research_१?q=research
2. Thomas Savery - https://en.wikipedia.org/wiki/Thomas_Savery
3. Humphry Davy - https://www.bulbs.com/learning/history.aspx
4. Thomas Edison - https://www.bulbs.com/learning/history.aspx


http://vidyajournal.org

[20] वेदान्तसारः – एतैरतिप्राकृतवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाऽभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाऽभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाऽभासैरात्मत्व- बाधदर्शनात् पुत्रादीनामनात्मत्वं स्पष्टमेव।।

[21] न्यायसूत्रम् – १/१/१

5. ADVANCED LEARNER'S DICTIONARY https://en.wikipedia.org/wiki/Research#:~:text=Another%२०definition%२०of%२०research%२०is,of%२०a%२०topic%२०or%२०issue%२२.
6. **All life is problem-solving** – Karl Raimund popper https://books.google.co.in/books/about/All_Life_is_Problem_Solving.html?id=Pa३cZYwdq२८C&source=kp_book_description&redir_esc=y

http://vidyajournal.org